International Journal of Sanskrit Research 2022; 8(4): 184-187

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2022; 8(4): 184-187
© 2022 IJSR
www.anantaajournal.com
Received: 26-05-2022
Accepted: 27-06-2022

**Prakash Kumar Tripathy**
Ph.D. Scholar
M.S.C.B.D University
Baripada, Odisha, India

# वैयाकरणदृष्ट्या शब्दार्थसम्वन्धविमर्शः

**Prakash Kumar Tripathy**

**सारांश**
शव्दनिष्ठसाधुत्वप्रकारकज्ञानजनकत्वं व्याकरणमिति व्याख्यापयन्ति मूर्धन्यभूताः शाव्दिकाः। महामुनिपाणिनिप्रणीताष्टाध्यायीव्याकरणं सर्वेषु प्राथम्यं राजतेतराम्। चतुष्षष्टिकलाकलितभाषाज्ञानस्य अपरिहार्यत्वात् व्याकरणं भाषाविकाशाय वोधवैशद्याय च आद्रीयते । लक्ष्येलक्षणं व्याकरणमिति भाष्यस्यापि लक्ष्यविषयकसाधुत्वज्ञापकत्वं सुत्रात्मकलक्षणमेव व्याकरणम्। तत् धर्मोत्पत्यर्थं व्याकरणस्य मध्यमादि वाक्विज्ञानद्वारा परंब्रह्माधिगमत्वमुक्तं वाक्यपदीये

"तत् व्याकरणमागम्य परंव्रह्माधिगम्यते।"

अखण्डवाक्यस्फोटस्य प्रतिपत्तये पाणिनिव्याकरणस्य महान्तं भाष्यं विरच्य महर्षिपतञ्जलिः वाक्रुपव्रह्मतत्त्वस्य स्वरुपं विशदीचकार। महाभाष्यप्रथमाह्निके वैदिकावैदिकाशव्दानुशासनं वास्तविकशब्दार्थाववोधनाय महदुपकारकमिति निश्चप्रचम्। महाभाष्यकारपतञ्जलेः समग्रं विवरणं पाणिनीयव्याकरणमुपजीव्य सम्पादितम्। यतः सूत्रवार्त्तिकरुपमाधारमाधाय गभीरपदार्थविवेचनात्मकं तत्त्वसमुच्चयमुपपादितम्।
सर्वो हि अर्थः स्वविषयसंविज्ञानजनकत्वं प्रतिपाद्य व्यवहारपथमवतरति। शब्दस्य अर्थप्रकाशकस्य अर्थतादात्म्यापन्नस्य बुद्धितादात्म्यापन्नेन स्वरूपेण अर्थोपादानत्वम्। आम्नाये संहृतक्रमं भोक्तृभोग्यमिदं तत् शक्तिरूपेण अवस्थितं सूक्ष्मवागात्मकम्। आत्मतत्त्वमेव बहुधाभिन्नस्य विश्वस्य कारणत्वेन प्रतिपादितम्। तेन परब्रह्मरूपेण शब्देन मुमुक्षुभिः साजुज्यमिष्यते। तस्मिन् खलु परावाग्रूपे नित्ये वाग्योगविदो सर्वान् वासनारूपान् सन्देहरूपाञ्च ग्रन्थीन् विच्छिद्य मोक्षमभिलषन्ति।

**प्रमुखशब्दाः** व्याकरणम्, शब्दब्रह्म, सूत्रम्, नित्यशब्दः, नित्यशब्दार्थ सम्वन्धः।

## १. प्रस्तावना

अखिलेऽस्मिन् जगतीतले लोकयात्रायां यथा धर्मस्वरूपज्ञानाय मीमांसाशास्त्रम्, प्रमाणस्वरूपज्ञानाय न्यायाशास्त्रम्, तथैव शब्दस्वरूपज्ञानाय व्याकरणमिति विपश्चितां सिद्धान्तः। तत्र वाक्यपदीयप्रथमकाण्डप्रतिपादितव्याकरणदर्शनमूलतत्त्वविवेचनात् अशेषमर्थजातं प्रतीयमानं शब्दानुविद्धमेव प्रतीयते, रूपादयो विषयाः शब्दरूपानुगता एव दृश्यन्ते। अतोऽर्थानां प्रकृतिः शब्दतत्त्वमेव। शब्दतत्त्वे ब्रह्मणि रूपादीनां भिन्नेन्द्रियग्राह्याणां कल्पितत्वेन भिन्नरूपतया अविद्यमानत्वात् तेषां शब्दतत्त्वस्य च परस्परं प्रकृतिविकृतिभाव उपपद्यते। यदि अर्थः शब्दात्मको न भवेत्तदा शाब्दे ज्ञानं न प्रतीयेत। सर्वेऽपि स्थितिप्रवृत्ति-निवृत्तिरूपा व्यवहाराः शब्देनैव क्रियन्ते। अतो व्यवहाराणां तद्विषयाणाञ्च मूलभूतं शब्दात्मकं ब्रह्मैव। तच्च अक्षराणां वर्णानां निमित्तत्वात् अक्षरमुच्यते। वाच्यवाचकभेदभिन्नस्य विश्वस्य जनिकाशक्तिः सूक्ष्मवाक्तत्त्वाश्रिता। अस्य सूक्ष्मवाक्तत्त्वस्य वाच्यवाचकोभयरूपेण विवर्त्तः। तत्रायं लयसर्गक्रमः विषयजातस्य विनश्यतः शाक्तिरूपेण इन्द्रियेषु प्रविलयः। इन्द्रियाणां बुद्धिवृत्तिषु, वुद्धेश्च सूक्ष्मवाक्तत्त्वे लयः, सृष्टिकाले सूक्ष्मात् शब्दतत्त्वात् बुद्धेरुद्भवः। बुद्धिश्च इन्द्रियाणाम्, इन्द्रियेभ्यः वाच्यवाचकोभयरूपाणां

**Corresponding Author:**
**Prakash Kumar Tripathy**
Ph.D. Scholar
M.S.C.B.D University
Baripada, Odisha, India

विषयाणाम्। सूक्ष्मं वाक्तत्त्वं हि ज्ञाता वक्ता च। विश्वमिदं शब्दशाक्तिनिबन्धनम्। शब्दोपादानञ्च सर्वा अपि अर्थमात्राः शब्दमात्रासु निश्चिताः। व्याकरणम्, शब्दब्रह्म, सूत्रम्, नित्यशब्दः, नित्यशब्दार्थ सम्वन्धः।

## २. शब्दार्थसम्बन्धः

अपशब्दान् अपसार्य साधुशब्दव्यवहाराय शब्दशास्त्रं नितरामपेक्षितमिति विपश्चितां मतम्। तथा चोक्तं वाक्यपदीये- 'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः'[१] इति। ऋग्वेदेऽपि 'वागेव विश्वा भुवनानि यज्ञे'[२] इत्युच्यते। एवञ्च-

"अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरम्।
विवर्त्ततेऽर्थभावेन प्रक्रिया जगतो यतः"।।[३]

इति वाक्यपदीयानुसारं विश्वस्यास्य शब्दोपादानकत्वमसन्दिग्धं प्रतीयते। तत्र शब्दश्रवणानन्तरं अर्थावशेषविज्ञानं कस्यचित् भवति कस्यचिच्च न भवति। तर्हि अत्र अर्थप्रतिपादनेच्छया निर्गतः शब्दः व्यर्थः सार्थको वेति जातायां जिज्ञासायामुच्यते यत् अस्ति शब्दार्थयोः कश्चन सम्बन्धः, यद्ग्रहणे अर्थविशेषस्य सम्प्रत्ययो भवति।
मीमांसकमते स च सम्बन्धः शक्तिपदार्थान्तरमिति, नैयायिकानां मते ईश्वरेच्छारूपसङ्केतो वा शक्तिरिति। सांख्याः योगाः अद्वैतवादिनश्च भेदाभेदरूपं तादात्म्यं शक्तिरिति कथयन्ति। प्राचीनवैयाकरणानां मते बोधकत्वं शक्तिरिति, नव्यास्तु शब्दार्थयोः वाच्यवाचकभाव एव शक्तिरिति निगदन्ति। पञ्चदश्यां सर्वेष्वेव भूतेषु शब्दस्थितिरभिहिता। तथा च-

क्षितौ चटचटाशब्दो जले बुदुबुदुध्वनिः
बह्नौ भुगुभुगुध्वनिर्वायौ विक्षीति शब्दनम्।।

वाक्यपदीये ब्रह्मकाण्डे-

अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते
व्यजनात् वायुरिव स स्वनिमित्तात्प्रतीयते।
ओङ्कारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा
कण्ठं भित्वा विनिर्यातौ तस्मान्माङ्गलिकावुभौ।।[४]
ब्रह्मसूत्र-२, भाष्यभामत्याम्।

अथाधुना पदेभ्यः पदार्थानां जन्म श्रुतं समुपपाद्य प्रदर्श्यते। तत्र श्रुतौ 'स भूरिति व्याहरम् स भूमिमसृजत्। भुवरित्यन्तरीक्षम्' इत्यादि श्रुयते।

वाक्यपदीयेऽपि-

शब्देष्वेवाश्रीताशक्तिः विश्वस्यास्य निबन्धनी
यन्नेत्रः प्रतिभात्मायं भेदरुपः प्रकाशते।।[५]

अत्रोच्यते बाह्यशब्दार्थवत् आभ्यन्तरा अपि शब्दा अर्थश्च। ते च बौद्धाः बुद्धौ समुपलभ्यामानत्वात्। बुद्धेरपि उपादानकारणत्वात् प्रकृतिविकृतिभावसत्वेन बौद्धयोरपि शब्दार्थयोस्तादात्मसयमेव सम्बन्धः।

## ३. शब्दस्याभिव्यक्तिप्रक्रिया

सकलपदार्थबोधजनकतया स्वाभिव्यक्तिप्रकटीकरणाय शब्दा एव हेतुत्वेन समुल्लसिता प्रतीयन्ते।

आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया।
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्।।
सोदीर्णामुर्धन्यभिहतो वक्त्रमापद्य मारुतः वर्णान् जनयते।[६]

इत्युक्ता प्रक्रिया। सा तु सर्गादौ जातस्य स्थितस्य शब्दस्यैवाभिव्यक्तिप्रक्रिया न तूत्पत्तिप्रक्रिया। जनयते इत्यस्य अभिव्यञ्जयतीत्यर्थः। अत्र कथ्यते यतः शब्दतन्मात्राणां कारणीभूत आत्मा परावाग्रूपेणाभिहितः, शब्दतन्मात्राणि तु पश्यन्तीशब्देन। वर्णपदवाक्यरूपाणि च मध्यमाशब्देन व्यवह्रियते। परश्रवणयोग्याः शब्दास्तावत् वैखरीशब्देनाभिधीयते। तथा चोक्तम्-

परावाङ्मूलचक्रस्था पश्यन्ती नाभिसंस्थिता
हृदिस्था मध्यमा ज्ञेया वैखरी कण्ठदेशगा।।[७]

अस्मिन् सन्दर्भे आत्मनः परा वागिति निर्देशः सार्थक्यं भजते प्रकृतिविकृत्योस्तादात्म्यात्। उक्तं च-

'स्वरूपज्योतिरेवान्तः परावागनपायिनी'[८]

शब्दतन्मात्रस्य तु पश्यन्तीपदेन निर्देशः, अर्थमाश्रित्य ज्ञानविषयो भवति। पश्यन्ती वैखर्याः मध्यभवत्वात् मध्यमापदेन निर्देशः विहितः। यद्यपि शब्दतन्मात्राणि सर्वेषां ज्ञानगोचराणि न भवन्ति, यतः वाग्योगिनां समाधौ ज्ञानगोचरत्वात्। परावाचः निर्देशः न क्वाप्युपलभ्यते। यदुक्तम्-

वैखर्याः मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्
अनेकतीर्थभेदायास्त्रय्या वाचः परंपदम्।।[९]

कारिकाप्रामाण्यात् भर्तृहरिणा वाचः त्रैविध्यमेव स्वीकृतम्। तत्र "शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति" इति वचनप्रामाण्यात् शब्दस्य ब्रह्मत्व उक्तिः यथार्था। एवंविधविचारेण शब्दार्थयोस्तादात्म्यमेव सम्बन्धो भेदाभेदरूप इति। अतएव "ओमित्येकाक्षरं ब्रह्म" इति, रामेति द्व्यक्षरं नाम, मानभङ्गपिनाकिनः इति, वृद्धिरादैच्, ईदूदेद्द्विवचनं प्रगृह्यम् इति च संज्ञासंज्ञिनोः सामानाधिकरण्येन निर्देशः। यथा नीलो घटः इति। यदा अत्यन्तभेदपक्षः स्वीक्रियते तदा गौरश्च इति। अत्यन्ताभेदपक्षे घटो घट इति च।
अधुना भाषा विज्ञानवादिभिः कथ्यते यत् पदपदार्थयोः सम्बन्धो न नित्यः। शब्दानां कालभेदेन अर्थान्तरेषु प्रयोगदर्शनात्। तत्र जीवनयात्रायां सर्वं ज्ञानकदम्वकं शब्दानुविद्धमेव प्रतीयते। तदुक्तम्-

नसोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते।
अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते।।[१०]

तथा च रूपादयो विषयाः शब्दरूपानुगता एव दृश्यन्ते। गौरिति शब्दः गौरित्यर्थबोधकः गौरितिज्ञानञ्च। अतोऽर्थानां प्रकृतिः शब्दतत्त्वमेव ब्रह्म। लोके अखण्डशब्दराशयः यथा अधिगताः भवेयुः तदर्थं स्वल्पीयसा कालेन अल्पीयसाऽऽयासेन कृत्स्नमिदं व्याकरणशास्त्रं सर्वोत्कृष्टतां विभर्त्ति। गणपाठ-धातुपाठ-प्रत्याहारव्यवस्थादिभावेन वहवः पन्थानः एभिः संक्षिप्तानुशीलनैः समाश्रिताः सन्तीति विद्वद्भिः नाविदितम्। तत्र सर्वेषां शास्त्राणां सब्दमूलकत्वात्, साधुशब्दानां ज्ञानं च व्याकरणाधीनत्वात् व्याकरणशास्त्रस्य सर्वं शास्त्राधिकारकत्वमस्ति इति निश्चप्रचम्। काव्यादर्शे निगदितम्-

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वथा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्त्तते।।[११]

## ४. पाणिनीयतन्त्रे शब्दवैचित्र्यम्

निरुक्तादिषु षडङ्गेषु व्याकरणं प्रधानम्। प्रधानेषु कृतयत्नः फलवान् भवेत् इति भाष्यानुशीलनेन व्याकरणशास्त्रस्य पठनपाठनमवश्यं विधातव्यमिति, "ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनं सारस्वतं चापिशलं पाणिनीयकम्"[१२] इति प्रामाण्यात् सत्सु अनेकेषु व्याकारणशास्त्रेषु पाणिनीयं व्याकरणं प्रसिद्धं वर्त्तते। यतः पाणिनीयव्याकरणं सर्वपेक्षया सुसम्वृद्धं सुसम्पन्नं व्यापकं भाष्यवार्त्तिकादिभिः परिपूर्णत्वं गतम्।
शब्दानुशासनमुररीकृत्य पाणिनिना अष्टाध्यायी प्रणीता। सूत्रमयं कृत्स्नव्याकरणमिदं वैज्ञानिकमहिम्ना कृतं दृश्यते। यतोऽत्र व्याकरणे साधुशब्दानाभिधानपुरस्सरं केवलं भाषाशिक्षणं नात्र लक्ष्यम्, अपितु शब्दमाध्यमेन दार्शनिकतत्वस्य समधिगमोऽपि अत्रत्यवैचित्र्यम्। एतत् महाभाष्ये श्रीमता पतञ्जलिना प्रकटीकृतम्। यथा- "सोभना खलु पाणिनेः सुत्रस्य कृतिः" इति। सर्वेषु महेश्वरप्रसादीकृतं पाणिनीयं व्याकरणं आत्मनोऽपूर्वरचनानैपुण्येन सर्वानतिशेते। अतएव कथ्यते-

पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।।[१३]

अपिच –

शास्त्रेष्वाद्यं व्याकरणं मुखं तत्रापि पाणिनेः।
रम्यं तत्र महाभाष्यं रम्या तत्रापि पस्पपशः।।[१४]

महाभाष्यकारः भगवान् पतञ्जलिः एतेषां महत्त्वं प्रकटीकृत्य प्रोवाच- "प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे प्राङ्मुख उपविश्य महताप्रयत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण" इति अपिच "सामर्थ्ययोगान्नहि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात्" इति।
अपृक्त एकाल्प्रत्ययः इति अपृक्तसंज्ञायाः प्रत्ययसंज्ञात्वात् प्रत्ययसंकलनात्मके तृतीयाध्याये एतस्य उचितत्वेन द्वितीयपादे अस्यपाठस्य वैयर्थ्यापत्तेरिति चेन्न। तस्य परिभाषा सूत्रभावेन कल्पनामादाय अत्र पाठे तात्पर्यात्। प्रदीपकृता हि एतदेवाङ्गीकृतम् 'संज्ञाधिकारस्याऽयम्' इति। संज्ञाधिकारश्च संज्ञाप्रकरणे प्रथमाध्यये सूत्रस्यास्य सन्निवेशः। तत्र शब्दार्थयोः तादात्म्यस्य दर्शनान्तरीयवचनाभ्यूपगमनसिद्धत्वात् शब्दोत्पत्तेरव्यवहितोत्तरक्षणे अर्थस्याभ्युपगतिः यद्यपि स्वभावसिद्धा तथापि अनेकार्थावच्छिन्नशब्दानामर्थावगतौ अपूर्वा शैली पाणिनिना समाश्रिता।

## ५. विशिष्टार्थद्योतकम्

महर्षिपाणिनिः तदीयतन्त्रे वैशिष्ट्यप्रतिपादनपुरस्सरं तन्निर्णेतुमुपैति इति विदुषां सिद्धान्तः। वहुवचनप्रयोगः, पर्यायशब्दप्रयोगः, इति शब्दप्रयोगप्रभृतय उपाया आचार्यैरुपाश्रिता इति तत्परिशीलनादवगन्तुं शक्यते।

**तत्र वहुवचनप्रयोगः** "मद्रेभ्योऽञ्"[१५] इति सूत्रे मद्रशब्दस्य वहुवचनान्तकल्पनं जनपदवाचिनः ग्रहणं यथा स्यात् इति तात्पर्यम्।
**पर्यायशब्दप्रयोगः** विशिष्टार्थद्योतने पर्यायशब्दस्य प्रयोगः आचार्याणामन्यतमं वैशिष्ट्यम्। तथाहि 'मतिबुद्धिपूजार्थेभ्यश्च'[१६] इति सूत्रे मतिः बुद्धि इति अनयोः ग्रहणं समानार्थकत्वेऽपि कथमिति चेत् मति इत्यस्य इच्छाऽर्थे तात्पर्यं यथा स्यादिति। तदुक्तं कौमुद्याम्- 'मतिरिहेच्छा बुद्धेः पृथगुपादानात् इति। एवमेव 'क्रतुयज्ञेभ्यश्च'[१७] इति सूत्रे क्रतुयज्ञयोर्ग्रहणम्, असोमकस्य यज्ञस्य ग्रहणं यथा स्यात्।
**इतिशब्दप्रयोगः** विशिष्टार्थप्रकाशने सूत्रकृता 'इति' शब्दस्यापि समभिव्याहारः सूत्रेषु उपदिष्टः। तद्यथा- तदस्यास्त्यस्मिन्निति मतुप्[१८] इति सूत्रे 'इति" शब्द प्रत्युत-वहुत्व-प्रशंसा-नित्ययोगे गम्यमानार्थे प्रयुक्तः।
पुनश्च पाणिनीयतन्त्रे शब्दार्थयोः वैशिष्ट्यप्रतिपादनेच्छया शब्दानुवृत्तिः अर्थानुवृत्तिरिति भावेन द्विविधो व्यवहारः परिलक्ष्यते। तत्र यदा यवपदं पूर्वस्मिन् सूत्रे यदर्थसम्पादनाय आचार्येण उच्चारितम्, तमर्थं परित्यज्य उद्रारसूत्रे केवलं पदमेव अनुवर्त्तते तदा शब्दानुवृत्तिः क्रियते। तस्य सूत्रस्य प्रकरणानुसारमेवार्थः क्रियते। 'यूस्त्याख्यौ नदी'[१९] इत्यत्र 'यू' इति पदं 'शेषोध्वसखि'[२०] इति सूत्रे अनुवर्त्तते। तत्र सूत्रे 'यू' इति दीर्घपरकः ईकारान्तस्य ऊकारान्तस्य च नदीसंज्ञा क्रियते। परमत्र सखिभिन्नह्रस्वान्तस्य 'घि' संज्ञाविधानेच्छया तदनुवर्त्तनात् ह्रस्वपरकमेवेष्टम्। तत्र शब्दानुवृत्तिमन्तरेण साधयितुमशक्यम्। यत्र च पूर्वसूत्रात् उत्तारसूत्रे अनुवर्त्तमानं पदं तत्रत्यमर्थमपरित्यज्य एव नीयते तत्र अर्थानुवृत्तिः क्रियते। यथा 'झोऽन्तः'[२१] इति सूत्रे 'प्रत्यय' इति 'आयनेयीनीयियः'[२२] इति सूत्रात् अर्थमात्रमनुवर्त्तते।

## ६. उपसंहारः

'अर्द्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः' इति न्यायेन मात्रैकस्य लाघवार्थमाचार्याः यतन्ते। एकस्य अर्थस्य कृते चमत्कारिताया उपपादनार्थं यथा काव्ये कावयः कलयन्ति तथा च व्याकरणे। वैयाकरणाः अर्थेपपादनाय एरा तेषां रहस्यम्। तत्रपि आचार्यैः एकस्य अर्थस्य कृते पर्यायवाचिशब्दानां प्रयोगः विनियुक्तः। यथा विकल्पार्थप्रतिपत्तयैव "विभाषा अन्यतरस्याम्" इत्यादि पदानां प्रयोगः दृश्यते। "पर्यायवाचिशब्दानां लाघवगौरवचर्चा नाश्रीयते" इति परिभाषया गौरवकल्पना नाद्रीयते इति।

वस्तुतस्तु कुत्रचित् स्थले कम् अर्थम् आदाय तेषां पदानां प्रयोगविज्ञानम् आचार्यैरभिलषितामिति विस्पष्टतया वक्तुं वयमशक्ताः। "सति तात्पर्ये सर्वे सर्वाथावाचका"[२३] इति मञ्जुषायां नागेशवचनाश्रयणादेव तस्य प्रकृतार्थ निरुपयितुं न कोऽपि यत्नवान् सन् सफलो भविष्यतीति तत्र न प्रतिपदपाठोऽपि आद्रीयते। यतः भाष्ये- "वृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच नान्तं जगाम। वृहस्पतिश्च प्रवक्ता, इन्द्रश्च अध्येता, दिव्यं वर्षसहस्रम् अध्ययनकालः, न चान्तं जगाम, किं पुनः अद्यत्वे, यः सर्वथा चिरं जीवति वर्षशतं जीवति"[२४]। अतः शब्दानुसारेणैव अर्थावगतिर्न वस्त्वनुसारेण। तदुच्यते "यत्शब्द आह तदस्माकं प्रमाणमिति" उद्योतः।

भगवता पाणिनिना अर्थाभ्युपगमनाय तदीयतन्त्रे बहुधा विचित्रा शैली समुपाश्रिता इति लक्ष्यते। यतः व्याकरणशास्त्राभिप्रेतविषयः शब्दश्च अभिन्नः। तत्र शब्देन वस्तु तद्रूपेण वाच्यं सत् सङ्केतग्रहसहकारेण परिच्छिद्यते। अतस्तयोः प्रकृतिविकृतिभावबोधने, तदा शाब्दे ज्ञाने न प्रतीयते, किन्तु शब्देन शब्द एव प्रतीयते। अन्येन अन्यस्य प्रतीतरसम्भवात्। प्रतियते च शब्देन अर्थः इति शब्दप्राकृतिकतया शब्दात्मकः अर्थः। किं च शब्देन विषयविशिष्टं ज्ञानमभिलष्यते, मम घटज्ञानं जातम्। न च अन्येन अन्यस्य अभिलाषयुक्ततादात्म्यात् इति शब्दात्मकोऽर्थो ज्ञानं चेति। किञ्च सर्वेऽपि स्थितिप्रवृत्तिनिवृत्तिरूपा व्यवहाराः शब्देनैव क्रियन्ते। तदुक्तं हरिणा-

शब्दस्य परिणामोऽयमित्याम्नायविदो विदुः।
छन्देभ्य एव प्रथममेतद्विश्वं व्यवर्त्तते।।

शव्दतत्वं तावत् ब्रह्म, अक्षराणां वर्णानां निमित्तत्वात् उपादानत्वात् च अक्षरमित्युच्यते।

**७. सहायकग्रन्थाः**


1. वा.प.ब्र.का – १४१
2. ऋ.वे
3. वा.प.ब्र.का – १
4. ब्र.सू.शां.भा.
5. वा.प.ब्र.का – ११८
6. पा.शि.
7. प.ल.स्फो.
8. वा.प.ब्र.का
9. वा.प.ब्र.का – १४२
10. वा.प.ब्र.का – १४३
11. का.द.
12. व्या.सा.ई.
13. व्या.सा.ई.
14. व्या.सा.ई.
15. पा.सू. – ४.२.१०८
16. पा.सू. – ३.२.१८८
17. पा.सू. – ४.३.६८
18. पा.सू. – ५.२.९४
19. पा.सू.
20. पा.सू. – १.४.७
21. पा.सू. – ७.१.३
22. पा.सू. – ७.१.३
23. पा.सू. – ७.१.२
24. प.ल.स्फ.
25. म.भा.पस्पपश्